शिव पद मणिमाला

शिव पद मणिमाला

शिवेति द्वौवर्णौ परपद नयद्वंस गरुतौ
तटौ संसाराब्धेर्निजविषय बोधांकुर दले |
श्रुतेरंतर्गोपायित पररहस्यौ हृदिचरौ
घरट्टग्रावाणौ भव विटपि बीजौघ दलने || 1 ||

शिवेति द्वौवर्णौ जनन विजय स्तंभ कलशौ
दुरंतांतर्ध्वांत प्रमथन शुभाधान चतुरौ |
महायात्राध्वस्य प्रमुख जनता कंचुकिवरौ
मरुज्घंपायौतौ कृतफल नवांभोदमथने || 2 ||

शिवेति द्वौवर्णौ शिवमवदतां चैव वसुधा-
-मुभाभ्यां वर्णाभ्यां रथरथिक यो राज्यकलनात् |
ततः सर्वः शेषः परिकर इहात्यत्किमपि नो
क्व चाऽहं क्व त्वं ना क्व परमिदमूह्यं बुधगणैः || 3 ||

शिवेति द्वौवर्णौ विहपरसुखाधान चतुरौ
क्रमोच्चाराद्धातोर्विनिमयवशादर्थघटने |
रहस्यार्थो ह्येषः प्रकटयति नाम्नि क्षितिरथं
प्रजानामानंदं किमिति न विदुर्मूढधिषणाः || 4 ||

शिवेति द्वौवर्णौ यजुषितु चतुर्थ्येकवचनो
नमः पूर्वो मंत्रः समजनिजनिध्वंस हतये |
तथापि प्रज्ञांधाः जननमृति नक्राहिजटिले
पतंत्येतच्चित्रं भवजलधिपंके शिवशिव || 5 ||

शिवेति द्वौवर्णौ भजत भजदानंदजनके
भुवो भर्ता भूत्वा स तु भवति मुक्तेरपि तथा |
उभाभ्यां वर्णाभ्यामधिगमयतार्तं विनिमयात्
ववर्णो भूभारं दिशति हि शिकारः परपदं || 6 ||

शिवेति द्वौवर्णौ द्विवचन कृत द्वंद्वकलना-
-द्ब्रुवंतौ गूढार्थं भगवदनुबंधान्वित धियः |
न कश्चिन्मंत्रश्च प्रथयति तदर्थानुगमनं
ततोऽयं सर्वासु श्रुतिषु जयघंटा विजयते || 7 ||

शिवेति द्वौवर्णौ प्रथममभिधायानुगुणतः
अथो मे संधानाद्भतिरिति च संधान परथ |
न कालो बध्नाति त्यजति ननु तत्काल इह वः
किमर्थं संसारे पतथ यतथेमं मनुवरं || 8 ||

शिवेति द्वौवर्णौ चरमपद विश्वस्वरयुता
वहं शब्दोच्चाराद्भवति खलु वर्णत्रयमनुः |
इमं प्राणायामैः पठथ हठयोगादिभिरलं
भवेदात्मेशैक्यं करबदरतुल्यं बुधवराः || 9 ||

शिवेति द्वौवर्णौ मम कनकरत्नायुषकथा
सुधाभोगाभोगामनुजपतपोध्यानविधयः |
प्रथा बोधस्मृतिरतिगति प्राप्तिनिधयः
भवेतां प्रारब्ध प्रमथन शुभाधान चतुरौ || 10 ||

शिवेति द्वौवर्णौ प्रति सरधरौ मुक्तिजनने
जनुर्लक्षाकोटि प्रमथन परा नित्यसदृशौ |
कियंतो विस्रस्ता जगति जनका मज्जननतः
स्मृतिं जज्ञे चित्तं शिवशिव कदाप्यस्तुव जनुः || 11 ||

शिवेति द्वौवर्णौ विहजनुषि लब्धौकिलमुया
पुरा गंगा स्नाता ननु किमु कृतं चाध्वरशतं |
जडस्यैवं किं स्याज्जनककृतमाद्यं खलु तपः
कुमारो मे स्यादित्यनुमितमिदं तद्धि परमं || 12 ||

शिवेति द्वौवर्णौ शिवशिव कदा नो पठितवान्
पुरा नो चेत् किंस्वित् जठर पिठरी संस्थितिरियं |
क्व शंभोर्नामोक्तिः क्व जननकथा चंडकिरणे
तपत्यभ्रेऽदभ्र भ्रमणमिह किं स्याद्धि तमसः || 13 ||

शिवेति द्वौवर्णौ निरत दुरित ध्वंसनपरौ
अयत्नाद्यस्यास्तां जगति सकृदास्यांतरगतौ |
न तस्याप्याशास्यः सुरकुलधुरीणस्य निलयः
न धातुस्तस्यासीत्पितुरपि स सर्वस्य जनकः || 14 ||

शिवेति द्वौवर्णौ जगपति समवायस्तदपरं
निमित्तं वर्णानां श्रुतिपथ रहस्यं निगदितं |
न चेदित्थं सृष्टौ परिकर इहान्योस्तियदिकः
शिवे सर्वाद्वैते न किमपि च वस्तुप्रथयति || 15 ||

शिवेति द्वौवर्णौ वचसि मनसि ध्वस्त दुरितौ
प्रहृत्यांतर्ध्वांतं मिहिर शशिनोः शक्तिमघनां |
प्रहस्य व्याख्यातस्तदुचित तमोभेदनपदे
समासे नो षष्ठी विकसति तृतीयैव सुकरा || 16 ||

शिवेति द्वौवर्णौ भुवन भवजातांडघटना
पटिष्ठे चोर्ध्वाथः स्फुटपटुतरे खर्परयुगे |
शिवोलिंगं सर्वं तदुदरगतं स्याद्धि निगमः
तथावादी सत्यं पदति खलु तत्केन भवति || 17 ||

शिवेति द्वौवर्णौ भज यज शिवार्धांग वपुषं
त्यजासंतं मार्गं व्रजशिवपुरीं मुक्तिनिलयां |
न चेदेतौ वरौ भजसि यज दैवास्यममुतः
त्यज श्रौतं मार्गं व्रज निरयमिच्छैव सुखदा || 18 ||

शिवेति द्वौवर्णौ पठति समहान् धातृविषये
पलायध्वं यूयं भवथ भयभीता यमभटाः |
पतंत्या संसार भ्रमण परिताप प्रमथन
प्रचंडास्तस्याग्रे प्रमथपति वीक्षारसझराः || 19 ||

शिवेति द्वौवर्णौ मम विमल जन्मावनिरुहः
फले द्वे तत्रैकं जनयति रुचीः पायसमयीः |
फलत्येकं सर्पिर्द्वयमपि मदग्रग्रसनतः
त्वरत्येकास्वादे नमति रुचितासीद्विकलने || 20 ||

शिवेति द्वौवर्णौ पठसि हठयोगादिभिरलं
किमुद्दिश्यात्मानं व्यथयसि वृथा भ्रांतिरफला |
करस्थे श्रीखंडे मृगयसि हि मुस्तां सिकतले
जडादेशः कां कां दिशति विपदं नो शिव शिव || 21 ||

शिवेति द्वौवर्णौ वद यदि शिवं वांछति भवान्
न चेदेतन्नेव श्रुतिसमय सिद्धांतमवदं |
विना हेतोः कार्यं न खलु पटतंतून् घटमृदः
न जानीषे किं वा शिवविरहितो नाप्स्यति शिवं || 22 ||

शिवेति द्वौवर्णौ परमशिव कारुण्यजलधे
स्थिरीकृत्य स्वांते मम विमलभावं कुरु सदा |
चरेयं सर्वं ते निरुपम निरातंक महसां
ज्वलज्ज्वालाजाल ज्वलितमिदमासीज्जगदिति || 23 ||

शिवेति द्वौवर्णौ वद वद रसज्ञे बुधगणाः
भवंतीं तन्नाम्नीमभिदधतु चैनं यदि न चेत् |
न योगं रूढिं वा भजसि खलु डित्थादि तुलना
भवेद्दैवीशक्तिस्त्वयि विफलिता स्याद्विचिनुहि || 24 ||

शिवेति द्वौवर्णौ जगति खलु नेत्रद्वयमिदं
बहिश्चक्षुर्द्वंद्वं न हि दिशति वस्तु व्यवहितं |
इदं बाह्याभ्यंतः स्फुट विमल विज्ञान विभवं
गरीयस्त्वोच्चाराद्दिशति खलु नेत्रं समधिकं || 25 ||

शिवेति द्वौवर्णौ वदनसदने यस्य महतः
तदीयं पादाब्जं रघुपति पदाब्जं प्रहसति |
न तच्चित्रं तस्मिन् परम पुरुषार्थं प्रदरजो
व्रजालाने मौनेर्दिशति किल संसारपतनं || 26 ||

शिवेति द्वौवर्णौ सकृथवशमुच्चारण बलात्
दिशेतां साम्राज्यं पुरमथन ते मुक्तिनिलयं |
न चेत्तस्यैवांतः किमिव निवसेदांतरगुहा-
-विहारेलोलः सन्निदमुदवहन्मे दृढपदं || 27 ||

शिवेति द्वौवर्णौ क्षितिजलशिखिस्पर्शनवियत्
विवस्वच्छीतांशु प्रथमपुरुषैरष्टभिरिदं |
ततं विश्वं पश्चाद्वदति इति मत्वा सुखमहो
नरः प्रोज्झन् सर्वं किमिति न पिबेत्तन्मथुरसं || 28 ||

शिवेति द्वौवर्णौ प्रकटित निजद्वंद्वविधया
जगन्मातापित्रोर्मिधुनमदधातां श्रुतिपथे |
जनास्तस्माद्यूयं तरत चरतावश्यमवनौ
पितृभ्यां नैवान्यत् परमपद संप्राप्ति विभवे || 29 ||

शिवेति द्वौवर्णौ रसिक रसना रंगचतुरौ
मनोधर्माधर्माभ्यसन गजकंठीरव शिशू |
वपुः कार्याकार्य व्यसन हरिण व्याघ्रकलभौ
विनोदं तन्वाते किमिह मम कालापनयने || 30 ||

शिवेति द्वौवर्णौ जगति वशधातु प्रकटिता
विति प्रोचुः केचिद्ध्रुवमिति तदीयास्त्वचतुराः |
शिवात्सूत्रोद्धारस्तदनुखलु धात्वर्थ विवृतिः
कथं पौर्वापर्यं वदत विबुधाः संशयमिदं || 31 ||

शिवेति द्वौवर्णौ गुरुमुखत येष्यन्नहरहः
जपिष्यत्याशास्यं न खलु तदयं पूर्णहृदयः |
इति प्राचीनास्ते शिवपदमुपेत्य स्थितिमिताः
किमुद्दिश्याजापीस्त्वमिह शिव एवासि भगवान् || 32 ||

शिवेति द्वौवर्णौ मनुरयमभिन्न स्वरहलां
विभेदाश्चत्वारः फलित पुरुषार्थः श्रुतिमताः |
नचैकस्मिन्मंत्रे सकलपुरुषार्थ प्रतिगतिः
किमर्थं भ्रांत्यान्यन्मनु धिषणया बिभ्रथ धुरं || 33 ||

शिवेति द्वौवर्णौ मधुरिम गरिम्णा मधुरसे
पयःपूरे कुत्सां न परमपरं किं जनयतां |
जिहासन्नाहारे सुरपुरि सदा गांग सलिलं
पिबन् को वा लिप्सां भजति सरसः पल्वलजले || 34 ||

शिवेति द्वौवर्णौ परमपद मां पाहि पदयो-
-र्मिळित्वाधावंते युगमभव दष्टाक्षरमनुः |
सकृत्तं यः कोवा पठति तदधीनो गिरिधनुः
परः सर्वाद्वैत प्रथित निजसाम्राज्यविभवैः || 35 ||

शिवेति द्वौवर्णौ मम वपुषि सर्वांग कवचौ
परं सव्यासव्य प्रसरण पटिष्ठांबक वरौ |
उभावंतर्बाह्याहित मथनकोदंडतिलकौ
भृशं स्यात्तां मोक्षश्रियमवसरे दातु मुदितौ || 36 ||

शिवपदादधिको न परो मनुः
शिवपदादधिका न परा गतिः |
शिवपदादधिकं न परं पदं
शिवपदादधिकं न हि शासनं || 37 ||

शिवस्त्राता शिवोदाता शिवो माता शिवः पिता |
शिव एव हि मे सर्वं शिवादन्यं न वेद्म्यहं || 38 ||

शिवपदमणिमालां ये तु कैवल्यमूलां
दधति पठनमात्राद्द्राक्छिवाधीन चित्ताः |
भवति खलु भवानी भर्गयो राजधानी
प्रमथ विहृतिवाटी भानुभूतेश्च पेटी || 39 ||

शिवलिंगमुमैवांग मनया सहितस्तथा |
तयोः संबंध इत्येवं पदत्रयमुपास्महे || 40 ||

इति श्रीशंकराचार्यकृत शिवपदमणिमाला |